विभ्रमः, पुं, ( वि+भ्रम+घञ् । ) हावभेदः । स तु स्त्रीणां शृङ्गारभावजक्रियाविशेषः । इत्यमरः ॥ ( यथा, मेघदूते । २८ ।
"स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥")
मदरागहर्षजनितविपर्य्यासो विभ्रमः । यथा अन्यनिमित्तमानसादुत्थायान्यत्र गमनं प्रियारब्धकथामाक्षिप्य सख्या सहालपनसुचेष्टितक्रोधौ पुष्पादीनां वाञ्छया सहसैव तत्परित्यागः । वस्त्राभरणमाल्यानामकारणतः खण्डनं मानानञ्च । यदुक्तम् ।
"क्रोधः स्मितञ्च कुसुमाभरणादियाच्ञा
तद्ध्वंसनञ्च सहसैव विमण्डनञ्च ।
आक्षिप्य कान्तवचनं जपनं सखीभि-
र्निष्कारणोत्थितगतं वद विभ्रमं तत् ॥" इति ।
"चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो भवेत् ॥" इत्यन्यच्च च । तथान्यच्च ।
"विभ्रमस्त्वरया काले भूषास्थानविपर्य्ययः ।"
यथा,—
"श्रुत्वायातं बहिः कान्तमसमापितभूषया ।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः ॥" इति ।
योषितां यौवनजो विकारो विभ्रमः । इत्यन्ये । विभ्रान्तिर्विभ्रमः घञ् । इति भरतः ॥ अपि च ।
"वल्लभप्राप्तिवेलायां मदनावेशसंभ्रमात् ।
विभ्रमो हारमाल्यादिभूषास्थानविपर्य्ययः ॥"
इत्युज्ज्वलनीलमणिः ॥*॥
भ्रान्तिः । इति मेदिनी । मे, ५२ ॥ ( यथा, भागवते । ४ । २१ । १२ ।
"तमभिभंगवानेत्य त्वरमाणं विहायसा ।
आमुक्तमिव पाषण्डं योऽधर्म्मे धर्म्मविभ्रमः ॥")
शोभा । ( यथा, राजतरङ्गिण्याम् ।३।३६७।
"ललाटे भ्रूलताभङ्गे जराशुक्लाः शिरोरुहाः ।
तस्य शम्भुश्मशानाङ्गिगङ्गाम्भोविभ्रमं दधुः ॥"
यथा च अमरुशतके । १ ।
"ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातुमञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥")
संशयः । इति हेमचन्द्रः ॥ ( यथा, कथासरित्सागरे । १६ । ६५ ।
"पूरयन् बहुनादाभिर्व्वाद्विनीभिर्भुवस्तलम् ।
कुर्व्वन्नकालनिर्म्मेघवर्षासमयविभ्रमम् ॥")
भ्रमणम् । इति शब्दरत्नावली ॥ ( विकारविशेषः । यथा,—
"तीव्रार्त्तिरपि नाजीर्णी पिबेच्छूलघ्नमौषधम् ।
आमसन्नोऽनलो नालं पक्तुं दोषौषधाशनम् ॥
निहन्यादपि चैतेषां विभ्रमः सहसातुरम् ।
जीर्णाशने तु भैषज्यं युञ्ज्यात् स्तब्धगुरूदरे ॥"
इति वाभटे सूत्रस्थानेऽष्टमेऽध्याये ॥)
विभ्रमा, स्त्री, वार्द्धक्यम् । इति शब्दरत्नावली ॥
विभ्राट्, [ज्] } त्रि, ( विशेषेण भ्राजते इति ।
विभ्राड्, [ज्] } वि+भ्राज् + "अन्येभ्योऽपि दृश्यते ।" ३।२।१७७ । इति क्विप् । ) अलङ्कारादिना दीप्तिशीलः । तत्पर्य्यायः । भ्राजिष्णुः २ रोचिष्णुः ३ । इत्यमरः ॥ ( यथा, ऋग्वेदे । १० । १७० । १ ।
"विभ्राड् बृहत्पिबतु सोम्यं
मध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ॥"
"विभ्राड् विभ्राजमानः विशेषेण दीप्यमानः ।" इति तद्भाष्ये सायणः ॥ )
विभ्रान्तः, त्रि, विभ्रमयुक्तः । विपूर्व्वभ्रमधातोः क्तप्रत्ययेन निष्पन्नः ॥ ( यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ॥")
विभ्रान्तिः, स्त्री, (वि+भ्रम+क्तिन् ।) विभ्रमः । इति विभ्रमशब्दटीकायां भरतः ॥ ( यथा, प्रबोधचन्द्रोदये । "स्फुरदद्वैतविभ्रान्तिसन्तानसन्तप्तवन्दारुसंसारनिदापहारे कदचेति ॥")
विमतः, त्रि, विरुद्धमतिविशिष्टः । विपूर्व्वमनधातोः क्तप्रत्ययेन निष्पन्नः ॥
विमनस्कः, त्रि, विमनाः । विनिगृहीतं मनोऽस्येति बहुव्रीहौ स्वार्थे कप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ७ । १० । ६१ ।
"विलोक्य भयसन्त्रस्तं विमनस्कं वृषध्वजम् ॥" )
विमनाः, [स्] त्रि, (विरुद्धं मनो यस्य ।) चिन्तादिव्याकुलचित्तः । तत्पर्य्यायः । दुर्म्मनाः २ अन्तर्म्मनाः ३ । इत्यमरः ॥ दुःखितमानसः ४ ॥ इति शब्दरत्नावली ॥ ( यथा, देवीभागवते । १ । १६ । १० ।
"स्थितमस्ति सदा राजन् मुदितो विमनास्तथा ।
मालायाञ्च तथा सर्पे समदृक् कृपोत्तम ! ॥")
विमयः, पुं, ( वि+मी+"एरच् ।" इत्यच् । ) विनिमयः । इति हेमचन्द्रः ॥
विमर्द्दः, पुं, ( विमृद्यतेऽसौ इति । वि+मृद्+घञ् । ) कालकुतरुः । इति रत्नमाला । कालकासुन्दिया इति भाषा ॥ विमर्द्दनम् । इति शब्दरत्नावली ॥ ( यथा, रघुः । ५ । ६५ ।
"तं कर्णभूषणनिपीड़ितपीवरांसं
शय्योत्तरच्छदविमर्द्दकृशाङ्गरागम् ॥"
सम्पर्कः । यथा, रघुः । १३ । २० ।
"असौ महेन्द्रद्विपदानगन्धि-
स्त्रिमार्गगावीचिविमर्द्दशीतः ॥"
"त्रिमार्गगा गङ्गा तस्या वीचीनां विमर्द्देन सम्पर्केण शीतः ।" इति तट्टीकायां मल्लिनाथः ॥*॥ युद्धम् । यथा, रामायणे ।३।३२।७।
"देवासुरविमर्द्देषु वज्राशनिकृतव्रणम् ॥"
कलहः । यथा, तत्रैव । ७ । ६३ । २४ ।
"कार्य्यार्थिनां विमर्द्दो हि राज्ञो दोषाय कल्पते ॥")
विमर्द्दकः, पुं, ( विमर्द्द एव । स्वार्थे कन् । ) चक्रमर्द्दः । इति राजनिर्घण्टः ॥ ( चक्रमर्द्दशब्देऽस्य गुणादयो विज्ञेयाः ॥ )
विमर्द्दनं, क्ली, ( वि+मृद्+ल्युट् । ) कुङ्कुमादिमर्द्दनम् । तत्पर्य्यायः । परिमलः २ । इत्यमरः ॥ विमर्द्दः ३ । इति शब्दरत्नावली ॥ विशेषेण मर्द्दनञ्च ॥ ( यथा, महाभारते । ३ । ३६ । ३ ।
"धर्म्मस्य जानमानोऽहं गतिमग्र्यां सुदुर्व्विदाम् ।
कथं बलात्करिष्यामि मेरोरिव विमर्द्दनम् ॥"
त्रि, विशेषेण मर्द्दयतीति । वि+मृद्+ल्युः । मर्द्दनकारी । पीड़ादायकः । यथा, कथासरित्सागरे । ११३ । २८ ।
"अभूच्च वारणस्तस्य परसेनाविमर्द्दनः ।
महान् कुवलयापीड़ इति ख्यातो महीतले ॥"
यथा च साहित्यदर्पणे । ४ । २६६ ।
"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥")
विमर्द्दोत्थः, पुं, ( विमर्द्दादुत्तिष्ठतीति । उत्+स्था+कः । ) मर्द्दनाज्जातसुगन्धादिः । यथा,—
"अथ गन्धे परिमलो विमर्द्दोत्थे मनोहरे ।
दूरगामी मनोहारी गन्ध आमोद ईरितः ॥"
इति शब्दरत्नावली ॥
विमर्शनं, क्ली, (वि+मृश+ल्युट् ।) परामर्शः । वितर्कः । यथा,—
"वितर्कः स्यादुन्नयनं परामर्शो विमर्शनम् ।
अध्याहारस्तर्क ऊहोऽथयान्यगुणदूषणम् ॥"
इति हेमचन्द्रः ॥
( विमृश्यतेऽनेनेति । करणे ल्युट् । ज्ञानम् । यथा, भागवते ६ । १ । ११ ।
"कर्म्मणा कर्म्मनिर्हारो न ह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥")
विम(र्शः)र्षः, पुं, (वि+मृ(श)ष+घञ् ।) विचारणा । इति जटाधरः ॥ ( यथा, कथासरित्सागरे । २० । १२४ ।
"प्रलयः स्त्रीषु सुख्याति विम(र्शो)र्षो विदुषामपि ॥")
विमलं, क्ली, ( विगतो मलो यस्मात् । ) तारहेमद्विधातुतम् । तद्रूपरसविशेषः । तत्पर्य्यायः । निर्म्मलम् २ स्वच्छम् ३ अमलम् ४ स्वच्छधातुकम् ५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । त्वग्दोषव्रणनाशित्वम् । रसवीर्य्यादौ तुल्यत्वम् । वेधे भिन्नवीर्य्यकत्वञ्च । इति राजनिर्घण्टः ॥ ( तथास्य शोधनमारणविधिः ।
"मूत्रारनालतैलेषु गोदुग्धे कदली रसे ।
कौलत्थे कोद्रवक्काथे माक्षिकं विमलन्तथा ॥
मुहुः सूरणकन्दस्थं स्वेदयेद्वरवर्णिनि ! ।
क्षाराम्ललवणैश्चैव तैलसर्पिःसमन्वितम् ॥
पुटत्रयं प्रदातव्यं ततस्तु शोधितं भवेत् ।
जम्बीरस्य रसे स्विन्नो मेषशृङ्गीरसैस्तथा ।
रम्भातोयेन वा पाच्यं घस्रं विमलशुद्धये ॥"
इति विमलशुद्धिः ॥ इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)
विमलं, त्रि, (विगतो मलो यस्मात् ।) निर्म्मलम् । तत्पर्य्यायः । वीध्रम् २ । इत्यमरः ॥ प्रयतम् ३ । इति शब्दरत्नावली ॥ ( यथा, रामायणे । २ । ४८ । १४ ।